National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 240 -243
© 2026 NJHSR
www.sanskritarticle.com

डा.छोटूकुमारमिश्रः
साहित्यविभागः,
हरियाणासंस्कृतविद्यापीठम्,
बघौला,पलवलम्

Correspondence:
डा.छोटूकुमारमिश्रः
साहित्यविभागः,
हरियाणासंस्कृतविद्यापीठम्,
बघौला, पलवलम्

# आलङ्कारिकाणां रसवादविश्लेषणम्

**डा. छोटूकुमारमिश्रः**

**विषयसारः-**
भारतीयकाव्यशास्त्रस्य षट्सु सम्प्रदायेषु **'रससम्प्रदायः'** सर्वप्रधानः। रससम्प्रदायानुसारेण **'रस एव काव्यस्यात्मा'** इति सिद्धान्तः प्रतिष्ठापितः। अस्य सम्प्रदायस्य प्रवर्तकाचार्यत्वेन भरतमुनिः परिगण्यते, यस्य प्रणीतं प्रसिद्धरससूत्रमाश्रित्यैव परवर्तिनः आचार्याः स्वस्वमतं प्रास्ताविषुः। प्रस्तुतनिबन्धे पाठकानां सुगमतायै रससम्प्रदायस्य प्रमुखसिद्धान्तानां विवेचनं कुर्वता तद्विकासक्रमे पण्डितराजजगन्नाथस्य मतस्य वैशिष्ट्यपूर्णं प्रतिपादनं प्रस्तुतमस्ति।

**कुटशब्दाः-** रसः, विभावाः, अनुभावाः, स्थायिभावा इत्यादयः।

भरतमुनिना सर्वादौ नाट्यशास्त्रे रसस्वरूपं प्रतिपादयतोच्यते-

**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः**[1] इति।

इदमेव रससूत्रमाश्रित्य मीमांसकैः, नैयायिकैः, सांख्यैः, आलङ्कारिकारैश्च स्वस्वसम्प्रदाया-नुसारं स्वप्रतिभया रसस्वरूपमुपन्यस्तम्। तत्र "संयोगात्" "निष्पतिः" इति पदद्वयमेव विविधव्या-ख्यायां मूलम्।

### ❖ मम्मटाचार्यमतम्-

मम्मटाचार्येण काव्यप्रकाशे तावत्सद्यःपरिनिर्वृत्तिधामत्वात्परमरमणीयो रसो न्यरूपि-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥**
**विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥**[2]

इत्थन्दृश्यते लोके नवयौवनोद्गलितचित्तवृत्तीनां यूनां कामिनीनाञ्च मिथो मनोहररूपावलो-कनेन सौन्दर्यादिगुणश्रवणेन वा प्रीतिर्जायते। ततस्तल्लावण्यादिभिश्चन्द्रिकोपवनधीरसमीरादिभिश्चो-रोपिता सा प्रीतिरभिलाषस्वरूपेण परिणमते, सैव प्रीतिः रतिः। एवं जातायां रतौ प्रियसमागमो-पायमाचरतोः प्रिययोश्चिन्ता-ग्लानि-शङ्का-विषादादयस्समुपजायन्ते। ततश्च मिथः प्रीतिव्यञ्जिका-श्चेष्टाः प्रादुर्भवन्ति। ततः कदाचित्काकतालीयन्यायेन स्वतोदूतीसम्प्रेषणादिना वा समागमस्सम्पद्यते। तत उत्तरोत्तरं सा रतिः प्रवणायते। चिन्तादयोऽप्युपगच्छन्ति। सैवात्युत्कटतां गता द्रवीभूते चित्ते प्रतिबिम्बते। यदुक्तम्-

**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।**
**तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥**[3]

चित्ते सैव वासनारूपेण स्थिता जन्मान्तरजाऽपि भवति। यथा द्रवीभूतायां लाक्षायां निक्षिप्तो रागः पुनः पृथक्कर्तुं न शक्यते तथैव वासनाऽप्यपहर्तुमशक्या चिरं चित्तेऽवतिष्ठते। अत इयं जन्मान्तरजाऽपि। कदाचिद् हृद्यरूपलावण्यसम्पद्भिरुद्बुद्ध्यते। इयमेव स्थितिः रसान्तस्थायिस्वपि ज्ञेया। एवं लोके तस्याः रतेर्यानि जनककारणानि ललनादीनि, यानि चोद्दीपनकारणानि चन्द्रोद्याना-दीनि यानि च तत्कार्याणि कटाक्षभुजाक्षेपस्तम्भरो-माञ्चादीनि यानि च तत्परिपोषहेतुभूतानि सहकारिकारणानि चिन्ताग्लानिहर्षादीनि तानि चेन्नाट्ये काव्ये च निबध्यन्ते तदा कारणानि विभावाः

कथ्यन्ते रत्यादयो विशेषेण भाव्यन्तेऽमीभिरिति च व्युत्पत्त्या। कार्याणि अनुभावाः कथ्यन्ते, रत्यादीननुभावयन्ति अनुमापयन्तीति विवरणात्। सहकारिकारणानि व्यभिचारिणः इति रसज्ञैरुच्यते। विशेषेणा-भिमुख्येन रत्यादीँश्चारयन्ति, विशेषादाभिमुख्येन चरन्तीति वा व्युत्पत्तेः। तदुच्यते प्रदीपे-

**विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।**

**स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ॥**[4]

एतैर्विभावादिभिर्व्यक्तो व्यञ्जनया प्रतिपादितः, विशेषेणोक्तः पानकरसन्यायेन विभावादिमिश्रणेनास्वादनीयतां प्राप्तोऽथवा व्यक्तः, व्यक्तिविशिष्टो व्यक्तिश्च चर्वणा। इत्थं चर्वणाविशिष्टस्स्थायीरसः। भग्नावरणाचिद्वा, तस्याः विषयो यस्स्थायी तैर्विभावादिभिस्सह रसः। तैरित्यत्र सहयोगे तृतीया। एवञ्च समूहालम्बनात्मको रसः। समूहालम्बने घटपटयोरिव पृथक्पृथक्प्रतीतिर्न शङ्क्या पानकर-सन्यायेन चर्वणात्। अत्र रत्यादिग्रहणेनैव स्थायित्वे सिद्धे पुनः स्थायीत्युक्तिस्तु रत्यादीनामपि रसान्तरे व्यभिचारित्वोपपादनायेति मम्मटमतम्।

### ❖ भट्टलोल्लटमतम्-

विभावानुभावव्यभिचारिभिरित्यत्र सहयोगे तृतीया। संयोगा-दित्यस्य सम्बन्धसामान्योऽर्थः, निष्पत्तिरित्यस्योत्पत्तिरर्थः। विभावश्च द्विविधः-

आलम्बनरूपः उद्दीपनरूपश्चेति। आलम्बनविभावाः ललनादयः उद्दीपनविभावाश्चन्द्रिकादयः। एवं रत्यादेस्स्थायिनो विभावेन ललनादिनोद्यानादिना च सह संयोगाज्जन्यजनकभावसम्बन्धात्, रत्यादिस्थायिभावो जनितः, यद्यप्युद्दीपनविभावा उद्दीपका एव न जनकास्तथापि विशेषाकारपरिणतिजनकत्वात्तेषामपि जनकत्वं ज्ञेयम्। अनुभावेन कटाक्षभुजा-क्षेपादिना सह संयोगाद्गम्यगमक-भावरूपसम्बन्धात्, रत्यादिस्थायिभावः प्रतीतिविषयीकृतः, व्यभि-चारिभिश्च निर्वेदग्लानिहर्षादिभिस्सह संयोगात्पौष्यपोषकभावरूप-सम्बन्धाद् रत्यादिस्थायिभावः पुष्टीकृतो रसः।

स च सीतादिविषयको रामादावनुकार्ये एव साक्षात्सम्बन्धेन विभावादिप्रतिपादककाव्यशब्दा-भिधया वा प्रतीयते। आरोप्यमाण-स्सहृदयानां साश्चर्यानुभवश्चमत्कारहेतुरिति। मतमिदञ्च मीमांसक-मतमुत्पतिवादश्च निगद्यते।

मतेऽस्मिन्विप्रतिपत्तयस्त्वित्थं सामाजिकेषु रसनिष्पतेरभावात्सा-माजिकानां चमत्काराभा-वादप्रवृतिः। न च वस्तुतो नायकगतस्यारो-पितनटगतस्य स्थायिनो ज्ञानमेव चमत्कारहेतुरिति शक्यम्। शाब्दज्ञानेऽपि लौकिकशृङ्गारदर्शनेनापि चमत्कारप्रसङ्गात्। किञ्चैवं रसस्य भ्रान्तित्वमापतेत्।

### ❖ श्रीशङ्कुकमतम्-

श्रीशङ्कुकमते रससूत्रस्यायमाशयो रत्यादेर्विभावादिभिस्सह संयोगा-दनुमाप्यानुमापकभावरूपसम्बन्धाद्रसस्य रत्यादेर्निष्पत्तिरनुमितिरि-त्यर्थः। लोके हि चतुर्धा प्रतीतयो भवन्ति, सम्यक्-मिथ्या-संशय-सादृश्यप्रतीतिभेदात्। तथा हि "राम एवायम्" इति रामत्वा-योगव्यवच्छेदिका प्रतीतिः, "अयमेव रामः" इत्यन्ययोगव्यवच्छेदिका प्रतीतिस्सम्यक्प्रतीतिः, "न रामोऽयम्" इत्युत्तरकालिक-बाधे सति "रामोऽयमिति या प्रतीतिस्सा मिथ्याप्रतीतिः,"रामः स्याद्वा न वा" इति संशयप्रतीतिः "रामसदृशोऽयम्" इति सादृश्यप्रतीतिरिति लौकिकचतसृभ्यः प्रतीतिभ्यो भिन्नया चित्रतुरगादिन्यायेन रामाद्यभिनयकर्तरि नटे "रामोऽयम्" इति प्रतीतिर्जायते तया प्रतीत्या विषयीकृतो नटः, अयञ्च पक्षः-

**सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः।**

**मनोरथश्रीर्भनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता॥**[5]

इति सम्भोगशृङ्गारस्य।

**दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च।**

**अविरलविलोलजलदः कालः समुपागतश्चायम्॥**[6]

इति विप्रलम्भभृङ्गारस्य च तत्काव्यार्थस्य साक्षात्करणरूपा-नुसन्धानसहकृतशिक्षाभ्यासाभ्यां सम्पादिताभिनयेन कृत्रिमविभावा-नुभावसहकारिणः प्रकाशयति। परञ्च सामाजिकास्तान्वास्तविका-न्मन्यन्ते न कृत्रिमतया, एवं नटेन प्रकाशितैर्विभावादिभिस्संयोगा-दनुमाप्यानुमापकभावरूपसम्बन्धा-दनुमीयमानो रत्यादिभावो नटेऽ-विद्यमानोऽपि स्थायित्वेन नटे सहृदयैस्सम्भाव्यमानस्स्थायिना-मास्वादमयत्वादस्यानुमानस्यान्यानुमानविलक्षणत्वात्सामाजिकानां चमत्कारिप्रतीतिरूपचर्वण-याऽऽस्वाद्यमानो रसः। अनुमानाकारश्चेत्थं रामोऽयं सीताविषयकरतिमान्सीताविषयककटाक्षा-दिमत्वाद्, यन्नैवं तन्नैवं यथा विरक्त इति।

अर्थात्सम्यग्-मिथ्या-संशय-सादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुर-गन्यायेन 'रामोऽयम्' इति प्रतीत्या ग्राह्येन नटेनाभिनयद्वारा प्रकाशितैः कृत्रिमतया ज्ञातैर्विभावादिभिः कुज्झटिकाकुलित-प्रदेशेऽविद्यमान-स्यापि धूमस्याभिमानाद्यथा धूमनियतस्य वह्नेरनुमानन्तद्वत्त-स्मिन्नविद्यमानोऽपि रत्यादिर्भावस्सामाजिकैरनुमीयमानस्स्ववास-नयास्वाद्यमानो रस इति। इदञ्च नैयायिकमतमनुमिति-वादश्चोच्यते। अस्मिन्मते विप्रतिपत्तयस्तु प्रत्यक्षमेव ज्ञानं चमत्कारजनकं नानुमित्यात्मकमित्यनुमीयमाने रसे चमत्कारानापत्तेः, रसं साक्षात्करोमीत्यनुव्यवसायानापतिश्चेति।

### ❖ भट्टनायकमतम्-

भट्टनायकमते तावत्सूत्रार्थो रत्यादेस्स्थायिनः, विभावानुभावव्यभि-चारिभिस्संयोगात्, भोज्यभोजकभावसम्बन्धात्, रसस्य निष्पत्ति-र्भुक्तिर्वेति। काव्येऽध्येता, श्रोता, नायको नाट्येऽपि अनुकार्यो नायकः, अनुकर्ता नटः, द्रष्टा सामाजिकश्चेति त्रयस्सन्ति। तत्र नायकगता, नटगता वा रसप्रतीतिस्स्यात्, तदा सामाजिकानामास्वादो न स्यात्। सामाजिकगता रसप्रतीतिर्भवितुं नार्हति, यतो हि स्थायी एव रसः। स्थायिनश्चोद्बोधकाः ये शकुन्तलादयो विभावास्ते सामाजिक-सम्बन्धिनो न सन्ति यद्यपि सामाजिकानां विभावास्तत्कान्तास्सन्ति, शकुन्तलाऽपि कान्ता। अतो विभावतावच्छेदके कान्तात्वं शकुन्तलादावप्यस्ति परन्तु तत्कान्तात्वं स्वस्रादिष्वप्यस्ति, ता अपि रत्युद्बोधका भविष्यन्तीति महदनर्थम्।

अतोऽगम्यात्वप्रकारज्ञानविरहविशिष्टं कान्तात्वं विभावतावच्छेद-कमिकि स्वीकर्तव्यम्[7]। तच्च शकुन्तलादौ न सम्भवति तत्र पूज्यत्वबुद्धेस्सत्त्वात्। अतः पूज्यत्वबुद्धेः प्रतिबन्धकं किमपि निरूपणीयम्। यद्यपि दुष्यन्ताद्यभिन्नोऽहमिति ज्ञानेन शकुन्तला-दावगम्यात्वप्रकारकज्ञानस्य विरहस्स्यात्तथापि दुष्यन्तो धराधरैयः, धीरोऽहं कापुरुषः आधुनिकश्चेति वैधर्म्यादभेदबुद्धिरपि दुर्लभा।

एवञ्चेयं रसप्रतीतिः कीदृशी? काव्यशब्दादेव जायतेऽतः शाब्दीति वक्तुं न शक्यते। व्यवहारिकशाब्दजन्यलौकिकनायकनायिकावृत्तान्तप्रतीतिर्यथा चमत्कारशून्या भवति तथैवास्यापि चमत्कारशून्यत्वापत्तेः। मानसी प्रतीतिरपि नास्ति, गुड इत्युक्तेर्माधुर्यस्य बोधेऽपि तत्र यथा न चमत्कारस्तथेहापि चमत्काराभावः प्रसज्येत। पूर्वानुभूतस्यैव स्मृतिर्भवति। अस्यानुभवजन्य-संस्कारजन्यत्वाभावात्, स्मृतिरपि नेति। तस्मात्काव्ये त्रयो व्यापारास्सम्भवन्ति-

**अभिधा भावना चैव तद्भोगीकृतिरेव च।**[8]

तत्राभिधया विभावादयो बोध्यन्ते। ततो भावकत्वव्यापारेणाऽगम्यात्वादिरसविरोधिज्ञान-प्रतिबन्धद्वारा,कान्तात्वादिरसानुकूलतया तेऽवस्थाप्यन्ते। एवन्दुष्यन्तशकुन्तलादेशकालवयोऽव-स्थादीन्साधारणीकृत्य विरते सति भावकत्वव्यापारे, भोजकत्वव्यापारेण रजस्तमसी निगीर्य प्रादुर्भूतसत्त्वजन्येन वेद्यान्तरस्पर्शशून्यस्वात्माऽऽनन्दस्वरूप-साक्षात्कारेण विषयीकृतो भावनोप-नीतस्साधारणात्मा रत्यादिस्स्थायी भुज्यते इति। तत्र भुज्यमानो रत्यादिः रत्यादिभोगो वा रसः। अयं भोग विभावादिविषयविशिष्टोऽतो ब्रह्मास्वादसविधवर्तीति कथ्यते।

मतेऽस्मिन्विप्रतिपतयो भावकत्वभोजकत्वेति व्यापारद्वयकल्पना-गौरवम्। यद्यपि भोजकत्वं व्यञ्जनैव तथापि भावकत्वस्य स्वीकारे गौरवम्। यद्यपि फलमुखगौरवं दोषाय, तथापि साधारणीकरणस्य व्यापारान्तरस्वीकारमन्तरापि सम्भवात्। भावकत्वं भावना। सा च सहृदयानां व्यापारो न काव्यस्येति।

### ❖ अभिनवगुप्तपादाचार्यमतम्-

अभिनवगुप्तपादाचार्यमते स्थायिनो विभावादिभिस्संयोगाद्व्यङ्ग्य-व्यञ्जकभावसम्बन्धाद्रसस्य निष्पत्तिरभिव्यक्तिर्वा भवतीति भरतमुनि-कृतसूत्रस्यार्थः।

लोके नायकयोर्मिथश्चेष्टां समीक्ष्य तयो रत्यादिकस्यानुमाने लब्धपाटवास्सहृदया यदा समुचितललितसन्निवेशचारु काव्यं पठन्ति नाट्यं वा पश्यन्ति तदा काव्येन प्रतिपादितान्नटेनाभिनय-द्वारा प्रकाशितान्वा कारणत्वादिकं परिहृत्यालौकिकविभावनादिव्यापार-वत्त्वाद्विभावादिव्यपदेशभाजः शकुन्तलादीन्विभावाँश्चन्द्रोद्यानादीनुद्दीपनविभावाननुपातादीननुभावाँश्चिन्तादीन्व्यभिचारिणो निज-सहृदयतासहकारेण भावनाविशेषमहिम्ना ते शकुन्तलात्वदुष्यन्त-रमणीत्वादिविशेषधर्मरहितान्साधा-रणीकृतानवगच्छन्ति। ततस्ते सम्भूयाऽलौकिकं व्यञ्जनाव्यापारं प्रादुर्भावयन्ति। ततो व्यञ्जनया सहृदयानामात्मन आनन्दांशावरणभूतमज्ञानमपसार्यते। ततस्सहृदयेष्वहमस्मीमे विभावादयो ममैव नान्यस्येत्यादिरूपा परिमितप्रमातृता लुप्यते। ततो वेद्यान्तरस्पर्शशून्याऽपरिमित-प्रमातृतामाप्तानां सहृदयानां चित्तेषु प्रागविनिविष्टवासनारूपेण स्थितो रत्यादिस्थायीभावो विभावादिसंवलितस्स्व-प्रकाशस्वरूपेण निजस्वरूपानन्देन विषयीक्रियमाणो ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृङ्गारादिको रसः। अत्र "आत्मा ज्ञातव्यः" इत्यादौ ज्ञानरूपस्यात्मनो ज्ञानस्य विषयीकरणमिव ज्ञानरूपस्प स्थायिनस्स्वप्रकाशेन ज्ञानेन विषयीकरणमविरुद्धम्। समूहालम्बनात्म-कोऽप्ययं पानकरसन्यायेन चर्व्यमाणोऽखण्डः। चर्वणाया उत्पादविनाशाभ्यां रसे उत्पादविनाशावुपचरितौ। इमे विभावादयस्स्वप्ने तुरगादय इव रङ्गरजतादय इव साक्षिभास्यास्सन्ति। वस्तुतो विभावादयो वासनारूपा एवेति। मतमिदमालङ्कारिकाणामेवञ्चाभिव्यक्ति-वादत्वेनोच्यते।

### ❖ पण्डितराजजगन्नाथमतम्-

पण्डितराजजगन्नाथेनैतन्मतचतुष्टयं स्वविलक्षणप्रतिभयोपपादित-मुच्यते च **इत्थं चाभिनवगु-प्तमम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणा-चिद्विशिष्टो रत्यादिः स्थायीभावो रस इति स्थितम् वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः।**[9]

अस्यायमाशः **रसो वै सः, रसं ह्येवायं लब्ध्याऽऽनन्दी भवती**ति श्रुतेश्चिदेव रस इति प्रतीयते न तु चिद्विशिष्टस्स्थायीति मम्मटभट्टेनाप्येतदुक्तम्।

वस्तुस्त्वत्र श्रुतिरीत्याऽद्वैतदर्शनरीत्या च ब्रह्मातिरिक्तं सर्वं मिथ्या जडोऽतो जडस्यानन्दा-त्मकताऽसम्भवात्, परमानन्दरूपे रसे रत्यादीनां विशेष्यता नोपपद्यते। श्रुत्या ब्रह्मैव रस इति प्रतीयतेऽतः पण्डितराजोक्तं युक्तम्। परन्त्वभिनवगुप्तमम्मटभट्टादयः काश्मीरिकाः शैवागमानुया-यिनस्तत्र चितिरूपा शक्तिरेव रतिः, सा च सुखस्वरूपेति परमानन्दतोपपद्यते इति दर्शनभेदादुभयमतं युक्तमेव।

पण्डितराजेन "नव्यास्तु" "परे तु" इति रीत्या नवीनं मतद्वयमुद्भावितम्। तत्र नव्यास्तु काव्ये कविना नाट्ये नटेन विभावादयः प्रकाश्यन्ते ततो व्यञ्जनायाः दुष्यन्तादौ शकुन्तलादीनां रतौ ज्ञातायां भावनाविशेषरूपदोषमहिम्ना कल्पितदुष्यन्तत्वेन सहृदयानामात्माऽवच्छादितो भवति, ततोऽस्मिन् दुष्यन्तत्वाच्छादिते आत्मनि समुत्पद्यमानः शकुन्तलादिविषयकरत्यादिरेव रसः। स च स्थायी साक्षिभास्योऽनिर्वचनीयो यथाऽज्ञानावच्छिन्ने शुक्तिशकले प्रतिभासमानो रजतखण्डस्साक्षिभास्यः अनिर्वचनीयश्चोच्यते तद्वदित्याहुः।

परे तु इति रीत्या भावनाविशेषरूपदोषमहिम्ना सहृदयानां स्वात्मनि काव्यार्थभावनाजन्यः **दुष्यन्तोऽहं शकुन्तलाविषयकरतिमानि**त्या-कारकस्स्वात्मविशेष्यको दुष्यन्ताद्यभेदविषयकशकुन्तला-दिविषय-करत्यादिमदभेदविलक्षणविषयताशाली बोध एव रसः।

पक्षेऽस्मिन्व्यञ्जनाव्यापारस्यानिर्वचनीयख्यातेश्चाङ्गीकारो नावश्यक इति। अन्येषामपि पञ्चानां मतानामुल्लेखोऽकार्षीत्पण्डितराजः। यथा-

**विभावादयस्त्रयः समुदिता रसा इति कतिपये।**[10]

विभावादिषु त्रिषु य एव चमत्कारी स रसः, चमत्काराभावे कोऽपि नेति बहवः।

भाव्यमानो विभाव एव रसः इत्यन्ये। अनुभावस्तथा रसः इतीतरे।

व्यभिचार्येव तथा तथा भावनाविषयीक्रियमाणो रसरूपतया परिणमतीति केचित्।

### ❖ उपसंहृतिः-

इत्थं पण्डितराजजगन्नाथेनैकादशमतानि प्रत्यपादिषत। तत्र चतुर्णामुपादानन्तु सर्वत्र लभ्यते। अन्तिमपञ्चानामुपादानन्तु लोचने दृश्यते। तथा हि-

**अन्ये शुद्धं विभावम्, अपरे शुद्धमनुभावम्, केचित्तु स्थायिमात्रम्, इतरे व्यभिचारिणम्, अन्ये तत्संयोगम्, एकेऽनुकार्यम्, केचन सफलमेव समुदायं रसमाहुरित्यर्त बहुना।**[11]

एष्वेव पञ्चानामुपादानं पण्डितराजेन किञ्चिद्वैलक्षण्यमुपपाद्य कृतम्, तेषु त्रयाणां मतानां निराकरणन्तु पण्डितराजेन सूत्रविरोधात्स्वयं क्रियते। एवमष्टसु "परे तु" "नव्यास्तु" इति मतद्वयं पण्डितराजो

वेदान्तिनामनिर्वचनीयख्यातिम्, नैयाकानामलौकिकसन्निकर्षं मानस-लक्षणां प्रत्यासत्तिं चानुसृत्य व्याचख्यौ। तत्र यथा रसस्य सामाजिकवृत्तित्वाभावेन भट्टलोल्लटमतमनुमेये चमत्कारा-भावात् श्रीशङ्कुकमतं भावकत्वव्यापारान्तरस्वीकारे गौरवाद्भट्टनायकमतं चापूर्णम्। तथा रसस्यानिर्वचनीयतायां **रसो वै सः** इति श्रुतिविरोधादवास्तविकत्वापत्तेश्च नव्यमतं रसेऽतात्त्विकत्वा-पातात् "परे तु मतं" स्थायिरहितत्वात्कतिपयेषां मतम्, बहूनां च मतमुपेक्ष्यमेव।

एकैकस्य रसत्वकल्पनन्तु प्रथमं नाट्यमवलोकयद्भिरनुकर्तुर्वेश-भूषादिभिरभिनयैश्च प्रभावितै-र्विभावस्य रसत्वं कल्पितम्। ततोऽनु-भावमन्तरा विभावस्य चमत्काराजनकत्वं विचार्यानुभावस्य, पुनश्चित्तवृत्तेरास्वाद्यतां विचार्य व्यभिचारी रसः, कदाचित् त्रिषु कस्यचिदेव चमत्कारितां निभाल्य य एव चमत्कारी स रस इत्युपपादितमस्ति। इदं प्रथमतया विशिष्टव्याख्या रससूत्रस्य भट्टलोल्लटे-नाऽक्रियत। ततस्तन्मतमग्रभूमिरूपेणासाद्य तत्र न्यूनतां निराकर्तुं श्रीशङ्कुकः प्रायतत। तत्रापि न्यूनतया भट्टनायकेन व्याख्यातम्।

मतमिदमतीवोपयुक्तम्। साधारणीकरणमेतदुपज्ञमेवाचार्यैस्स्वीकृतम्। भोजकत्वव्यापारश्च व्यञ्जनाव्यापार एवेति। वैशिष्ट्यं पुनर्भोजकत्वं कल्पितम्, व्यञ्जना ध्वनिकारेण व्याकरणदर्श-नरीत्योपपादिता। अत एवैषां चतुर्णामा-चार्याणां मतं प्रायस्सर्वैरालङ्कारिकैस्स्वस्वग्रन्थे निबद्ध्यते। अतश्चाभिनवगुप्तेनोच्यते-

**चित्रं निरालम्बनमेव मन्ये प्रमेयसिद्धौ प्रथमाऽवतारं**
**सन्मार्गलाभे सति सेतुबन्धपुरप्रतिष्ठादि न विस्मयाय।**
**तस्मात् सतामत्र न दूषितानि, मतानि तान्येव तु शोधितानि**
**पूर्वप्रतिष्ठापितयोजनासु मूलप्रतिष्ठाफलमामनन्ति॥**[12]

➢ **सन्दर्भग्रन्थसूची-**


१. **अलङ्कारशास्त्र की परम्परा।** डा. राजवंशसहायः 'हीरा'। चौखम्बाप्रकाशनम्, वाराणसी

२. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुर-भारतीप्रकाशनम्, वाराणसी, २०१७

३. **काव्यप्रकाश (प्रदीपटीका)।** मम्मटः। टीकाकारः-भट्ट वामनाचार्य, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, संस्करणम्-२०१३

४. **काव्यप्रकाशः (ज्योतिष्मती टीका)।** मम्मटः। व्याख्या. रामसागर-त्रिपाठी। मोतीलालबनारसीदासः, वाराणसी प्रथमसंस्करणम्-१९८२-भाग-१

५. **काव्यप्रकाशः (ज्योतिष्मती टीका)।** मम्मटः। व्याख्याकारः डा. रामसागरत्रिपाठी। मोतीलालबनारसीदासः, वाराणसी प्रथमसंस्करणम्-१९८३ भाग-२

६. **काव्यप्रकाशः(नागेश्वरीटीका)।** मम्मटः। व्याख्या. श्रीहरिशंकरशर्मा, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, पुनर्मुद्रणम्-वि०सं०-२०७०

७. **ध्वन्यालोकः।** आनन्दवर्धनः। व्याख्या. रामसागरत्रिपाठी। मोतीलालबनारसीदासः, दिल्ली, संस्करणम्-२०१७

८. **नाट्यशास्त्रम्।** भरतमुनिः। सम्पा. डा. पारसनाथद्विवेदी। सम्पूर्णा-नन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम्(४ भाग में प्रकाशित)

९. **श्रीमद्भगवद्गीता।** सम्पा.- स्वामी राममुखदासः। साधक सञ्जीवनी, गीताप्रेस, गोरखपुर, २००४।

१०. **संस्कृतसाहित्यस्येतिहासः।** आचार्यजगदीशचन्द्रमिश्रः। चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी, संस्करण-२०१८

११. **संस्कृतकाव्यस्योद्भवस्तथा विकासक्रमः।** जाह्नवीचरणभौमिकः। कलिकाता, संस्कृत पुस्तक भाण्डार, १९९७

१२. www.googlebook.com

१३. www.sanskrit.nic.in

१४. www.shodhganga.com


**पाद टिप्पणी**

[1]नाट्यशास्त्रम्, पुटसंख्या- १०५

[2]काव्यप्रकाशः-४।४२

[3]गीता- २।६७

[4]काव्यप्रकाशः, प्रदीपटीकायाम्

[5]अलङ्कारशास्त्र की परम्परा, पुटसंख्या- १०८

[6]अलङ्कारशास्त्र की परम्परा, पुटसंख्या- १०८

[7]यद्यप्यगम्यात्वप्रकारकं ज्ञानमात्मनि ततो ज्ञानविरहोऽप्यात्मन्येव ज्ञानविरहविशिष्टं कान्तात्वं कथम्? इति विप्रतिपत्तिस्तथापि "इयमगम्या" इत्याकारके ज्ञानेऽगम्यात्वं प्रकारः, इदमर्थो विशेष्यम्, अतो ज्ञानं समवायेनात्मनि प्रकारतासम्बन्धेनाऽगम्यात्वे, विशेष्यात-त्सम्बन्धेनेदमर्थे नायिकायाम्। अतो विशेष्यतासम्बन्धेनागम्या-त्वप्रकारज्ञानविरहविशिष्टं कान्तात्वं विभावताऽवगच्छेदं ज्ञेयम्। यदि भ्रमात्स्वकान्तायामपि "इयमगम्या" इत्याकारकं ज्ञानं स्यात्तदा सापि विभावो न स्यात्। अतोऽ-प्रमाण्यनिश्चयानालिङ्गितस्यागम्यात्व-प्रकारकज्ञानस्य विरहो विवक्षितः।

[8]अलङ्कारशास्त्र की परम्परा, पुटसंख्या- १०९

[9]रसगङ्गाधरः, पुटसंख्या- ३०५

[10] रसगङ्गाधरः, प्रस्तावनायाम्

[11] ध्वन्यालोकः, द्वितीय उद्योतः, पुटसंख्या-१८६

[12] अभिनवभारती, षष्ठोऽध्यायः